दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-121 | 1 | फरवरी 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लचतुर्थी
फाल्गुण ०९ प्रविष्ठांशः मङ्गलमयः भवेत्

2 प्रधानमन्त्रिणा सेवा तीर्थ मध्ये ए.आई. डीप-टेक स्टार्टअप इत्यनयोः सीईओ अधिकारिभिः साकं कृतानि गोल-मञ्चोपवेशनानि;

3 हिमाचले १४५ अभवत् सीबीएसई- संयुक्त- विद्यालयानां संख्या, सर्वकारस्य अनुमोदनम्

5 मालिनीवैलीकालेज_इफ_एजुकेशन कोटद्वार इत्यत्र दशदिवसीय-योग-प्रशिक्षण-शिविरस्य सफलतया समापन-समारोहः आयोजितः।

## जयपुरे भारतीयवायुसेनायाः भव्या विमानप्रदर्शिनी



**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः** ।जयपुरस्य ऐतिहासिके जलमहले भारतीयवायुसेनायाः पक्षतः एकस्य भव्यस्य विमानप्रदर्शनस्य आयोजनमभवत् । अस्मिन् कार्यक्रमे 'सारङ्ग' वायुविमान-दलस्य तथा 'सूर्यकिरण' एरोबेटिक-दलस्य च साहसिकैः विमानकौशलैः दर्शकाः मन्त्रमुग्धाः अभवन्। सारङ्ग-दलस्य पराक्रमः: कमाण्डिंग ऑफिसर अभिजीत इत्यस्य नेतृत्वे पञ्च वायुविमानानां 'सारङ्ग' दलेन आकाशे विविधाः प्रभावशालिन्यः आकृतयः विरचिताः। एते वायुविमानयानानि 'हिन्दुस्तान एयरोनॉटिक्स लिमिटेड' (HAL) द्वारा निर्मिताः सन्ति। तदनन्तरं 'सूर्यकिरण' दलस्य विमानैः आकाशे त्रिवर्णरञ्जितं धूम्रं प्रसारयन्तः विविधाः कलाकृतयः प्रदर्शिताः। उल्लेखनीयम् अस्ति यत् सूर्यकिरणदलेन विश्वे अधुना यावत् 800 तः अधिकाः प्रदर्शिन्यः कृताः। कार्यक्रमस्य सुचारुसञ्चालनाय प्रशासनेन आरक्षकदलेन च सुरक्षायाः यातायातस्य च विशेषप्रबन्धाः कृताः। ध्यातव्यं वर्त्तते यत् एषा विमानप्रदर्शिनी फरवरी मासस्य २२ दिनाङ्के अपि आयोजयिष्यते।

## ऐषमो भारत ए.आई. इम्पैक्ट समिट इति समुपवेशनस्य अवसरे प्रधानमन्त्री नरेन्द्रमोदी शीर्ष-नेतृभिः साकं कृतवान् द्विपाक्षिकाणि मन्त्रणोपवेशनानि



**हिमसंस्कृतवार्ताः** - षड्विंशत्यधिक द्विसहस्रतमवर्षस्य इण्डिया-ए. आई. इम्पैक्ट शिखर सम्मेलनावधौ प्रधानमन्त्रिणा नरेन्द्रमोदिना लिचटेन्स्टीन देशस्य राजकुमारेण अलोयिस इत्यनेन सह द्वैपाक्षिकोपवेशनं कृतम्। व्यापारः, निवेशः, ए. आई., नवान्वेषणम्, कौशलविकासेत्यादिषु क्षेत्रेषु सहकार्यं वर्धयितुं द्वावपि सहमतौ अभवताम्। नवदिल्लीनगरे प्रधानमन्त्री नरेन्द्रमोदी एआई इम्पैक्ट समिट् इत्यस्य सम्मेलनस्य अवसरे स्लोवाक-गणराज्यस्य राष्ट्रपतिना पीटर पेलेग्रीनी इत्यमुना सह द्वैपाक्षिकीं मन्त्रणां कृतवान्। उभयोः नेत्रोः मध्ये भारत-स्लोवाक-देशयोः सम्बन्धानां सुदृढीकरणाय विस्तृतः विचारविनिमयः अभवत्। कृत्रिमबुद्धिमत्ता, नवोन्मेषः, प्रौद्योगिकी, व्यापारः, निवेशः चेत्यादिषु क्षेत्रेषु सहयोगविस्तारस्य विषयोऽपि प्रमुखतया चर्चितः। प्रधानमन्त्री उक्तवान् यत् भारतं कृत्रिमबुद्धिमत्तायाः उदयोन्मुख प्रौद्योगिकीय-क्षेत्रेषु वैश्विक सहकार्यवृद्धये प्रतिबद्धम् अस्ति। उभौ नेतारौ परस्परं विश्वासस्य समान-लोकतान्त्रिक मूल्यानां च आधारेण सम्बन्धान् नूतन-उच्चतां प्रति नेतुं सहमतौ अभवताम्।

### भारत-श्रीलङ्का-देशयोः सम्बन्धानां सुदृढीकरणाय विस्तृतः विचारविनिमयः।

नवदेहल्यां हैदराबाद-भवने प्रधानमन्त्री नरेन्द्रमोदी श्रीलङ्का-लोकतान्त्रिक गणराज्यस्य राष्ट्रपतिना अनुरा कुमारा दिसानायके इत्यमुना सह द्वैपाक्षिकोपवेशनम् आचरितवान्। अस्यां मन्त्रणायाम् उभयोर्मध्ये भारत-श्रीलङ्का-देशयोः सम्बन्धानां सुदृढीकरणाय विस्तृतः विचारविनिमयः अभवत्। आर्थिक सहकार्य, विकास-साहमत्यं, सम्पर्क-परियोजनाः, क्षेत्रीय स्थैर्य-सम्बद्धाः विषयाश्च प्रमुखतया चर्चिताः। राष्ट्रपतिना दिसानायकेन कठिन-आर्थिक परिस्थितिषु भारतदेशेन प्रदत्तस्य साहाय्यस्य कृते कृतज्ञता प्रकटिता। प्रधानमन्त्री मोदी 'पड़ोसी प्रथम' इति प्रतिवेशी-प्रथम नीत्याः अन्तर्गतं श्रीलङ्कादेशं प्रति निरन्तरं सहकार्यस्य प्रतिबद्धतां साम्रेडितवान्। उभौ नेतारौ परस्परं विश्वासस्य, लोकतान्त्रिक मूल्यानां, क्षेत्रीय-शान्तेः च आधारेण द्विपक्षीय-सम्बन्धान् नूतन उच्चतां प्रति नेतुं संकल्पमपि कृतवन्तौ ।

## अरुणाचलप्रदेश-मिजोरमराज्ययोः राज्यस्थापनादिने राष्ट्रपतिना द्रौपदीमुर्मु-महोदयया शुभाशंसाः प्रदत्ताः

**हिमसंस्कृतवार्ताः** - अरुणाचलप्रदेश-मिजोरमराज्ययोः राज्यस्थापनादिने राष्ट्रपतिना द्रौपदीमुर्मु-महोदयया शुभाशंसाः प्रदत्ताः । भारतस्य राष्ट्रपतिः द्रौपदी मुर्मु महोदया अरुणाचलप्रदेश-राज्यस्य तथा मिजोरम-राज्यस्य राज्यस्थापनादिनस्य पावनावसरे तयोः राज्ययोः निवासिभ्यः हार्दिकाः शुभाशंसाः प्रेषितवती। स्वसन्देशे राष्ट्रपतिः अवदत् यत् अरुणाचलप्रदेशः नैसर्गिक सौन्दर्यस्य, जनजातीय संस्कृतेः, समृद्ध परम्पराणां च अनुपमः प्रतीकः अस्ति। मिजोरम-राज्यं च अनुशासनस्य, सामाजिक समरसतायाः, शिक्षाक्षेत्रे उत्कृष्ट-प्रयत्नानां च आदर्शरूपेण प्रसिद्धम् अस्ति। सा एतदपि अवदत् यत् उभे राज्ये राष्ट्रियैक्यस्य सुदृढीकरणे, सीमासुरक्षायां, सततविकासस्य संवर्धने च महत्त्वपूर्णं योगदानं कुरुतः। राष्ट्रपतिः विश्वासं व्यक्तवती यत् अरुणाचलप्रदेशः मिजोरमराज्यं च भविष्येऽपि प्रगतेः, नवोन्मेषस्य, पर्यावरणसंरक्षणस्य च क्षेत्रेषु निरन्तरम् उन्नतिं करिष्यतः तथा राष्ट्रस्य समग्रविकासाय योगदानं दास्यतः। अन्ते राष्ट्रपतिः कामनाम् अकरोत् यत् अयं राज्यस्थापनादिवसः नागरिकेषु ऐक्यभावं, समृद्धिं, प्रगतिं च अधिकं दृढीकरोतु तथा च राज्यद्वयम् अपि शान्तेः, सौहार्दस्य, सर्वसमावेशकविकासस्य च मार्गे निरन्तरं अग्रे गच्छतु ।

## सुभाषितम्

**उत्सवे व्यसने प्राप्ते,
दुर्भिक्षे शत्रुसंकटे।
राजद्वारे श्मशाने च,
यस्तिष्ठति स बान्धवः।।**

जो व्यक्ति किसी उत्सव में, किसी प्रकार के व्यसन में, दुर्भिक्ष (अकाल) के समय, शत्रु के द्वारा उत्पन्न संकट के समय, राजद्वार या श्मशान में तुम्हारे साथ हो, वही तुम्हारे मित्र और बान्धव के समान है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सर्वोच्च न्यायालयेन पश्चिम-बङ्ग-राज्ये एस.आई.आर. इति मतदातृ-सूचीनां विशेष-संशोधन-कार्यक्रमाय

### निर्वाचनायोगस्य साहाय्यार्थं वर्तमान-पूर्व-जनपद-न्यायाधीशानां नियुक्तेः निर्देशः प्रदत्तः

**हिमसंस्कृतवार्ताः** सर्वोच्चन्यायालयेन पश्चिमबङ्गप्रदेशे मतदातृ-सूच्यां विशेष-गहन-संशोधनार्थं निर्वाचनायोगस्य सहयोगाय पूर्व-सेवारतानां जनपद-न्यायाधीशानां नियुक्त्यर्थं निर्दिष्टम्। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्तयः जोयमल्या बागची, विपुल् एम् पञ्चोली च इत्येतेषां पीठेन राज्ये विशेष-गहन संशोधन-प्रक्रियायाः समापनं सुनिश्चतुम् अनेके नूतनाः निर्देशाः प्रदत्ताः। न्यायपीठेन तार्किक विसङ्गति-सूच्यां स्थापितानां जनानां अभियोगानां आक्षेपानां च न्यायनिर्णयस्य कृते न्यायिक अधिकारिणां प्रतिनियुक्तिं कर्तुम् आदिशत्। अनेन कलकत्ता-उच्चन्यायालयस्य मुख्यन्यायाधीशः न्यायिकाधिकारिणाम् अपसारणपूर्वकं एस्. आई आर्. कार्ये साहाय्यं कर्तुं पूर्वन्यायाधीशानाम् अन्वेषणार्थं च समादिष्टः, यतः राज्यसर्वकारेण संशोधनप्रक्रियायाः कृते पर्याप्तं ग्रेड् 'ए' अधिकारिणः नैव नियुक्ताः ।

# प्रधानमन्त्रिणा सेवा तीर्थ मध्ये ए.आई. डीप-टेक स्टार्टअप इत्यनयोः सीईओ अधिकारिभिः साकं कृतानि गोल-मञ्चोपवेशनानि; भारतस्य आवश्यकतानां अनुरूपं समाधानस्य विकासनार्थं कृतः आग्रहः



नवदेहल्यां राष्ट्रिय-राजधान्यां भारतमण्डपमित्यत्र समायोजितस्य India AI Impact Summit-2026 इति सम्मेलनस्य चतुर्थे दिवसे प्रधानमन्त्री नरेन्द्रमोदी उद्योग-प्रौद्योगिकीय-जगतां प्रमुख नेतृभिः सह समनुष्ठितम् एकं महत्त्वपूर्ण-गोलमञ्च-मन्त्रणोपवेशनं अध्यक्षितवान्। अस्याः मन्त्रणायाः मुख्यलक्ष्यं कृत्रिमबुद्धिमत्तायाः भविष्य-दिशा, तस्याः वैश्विक उत्तरदायित्वं तथा भारतस्य डिजिटल नेतृत्वस्य अवसराणां विषये व्यापकसंवादस्य स्थापना आसीत्। प्रधानमन्त्री उक्तवान् यत् कृत्रिमबुद्धिमत्ता अद्य विश्वे ऐतिहासिक-परिवर्तनस्य प्रमुख-शक्तिरेव दृश्यते, अतः अस्याः प्रौद्योगिक्याः विकासः सतत-मानव-कल्याणस्य दिशि एव नियोजनीयः। अमुना सबलं प्रतिपादितं यत् प्रौद्योगिक्याः परम लक्ष्यं केवलं आर्थिक विकासः न भवेत्, अपि तु सर्वेषां समावेशनम्, सर्वेभ्यः समान-अवसर-प्रदानं च स्यात्। अस्यां मन्त्राणायां विश्वस्य प्रमुख-प्रौद्योगिकीय क्षेत्राणां मुख्यकार्यकारि-अधिकारिणः, नवाचार-संस्थाः, उद्योग जगतः विशिष्ट-प्रतिनिधयश्च सहभागिनः अभवन्। तैः सह एआई-प्रणालीनां नैतिकता, सुरक्षा, पारदर्शिता, उत्तरदायित्वं चेति विषयेषु गम्भीर-विमर्शोऽजायत। एतस्मात् पूर्वं प्रधानमन्त्रिणा सम्मेलनस्य औपचारिक उद्घाटनम् अपि कृतम्, यस्मिन् बहवो राष्ट्र-नेतारः, प्रौद्योगिकी-विशेषज्ञाश्च सहभागिनः अभवन्। अस्मिन् वर्षे "AI for Human Welfare" इति भावनया सह "MANAV Vision" इति मानव-केन्द्रित संकल्पना विशेषरूपेण प्रस्तुताभवत्, या नैतिक-प्रौद्योगिकीय विकासं, पारदर्शितां च प्रोत्साहयति। भारतस्य प्रयासाः एआई-प्रौद्योगिकीं सरलां, समावेशिनीं च कृत्वा वैश्विक संसाधनरूपेण कृत्रिमबुद्धिमत्तायाः विकसनं लक्षयन्ति, येन नूतन-जीविका-सृजनम्, शिक्षा-विस्तारणम्, नवाचार-वर्धनं च सशक्ततया साध्येत। सम्मेलनमेतद् संदेशम् अयच्छत् यत् कृत्रिमबुद्धिमत्तायाः विकासः केवलं प्राविधिकोपलब्धिः न, अपि तु मानव-केन्द्रित-प्रगतिशील-चिन्तनस्य प्रतीकभूतं तत्वम् अस्ति।

## केन्द्रीयमन्त्री अश्विनीवैष्णवः इंडिया एआई इम्पैक्ट समिट् इति सम्मेलनावसरे सुन्दरपिचाई महोदयेन सह मिलितवान्।




केन्द्रीयमन्त्री अश्विनीवैष्णवः इंडिया एआई इम्पैक्ट समिट् इति सम्मेलनावसरे गूगल-अल्फाबेट-संस्थयोः मुख्यकार्यकारी-अधिकारिणा सुन्दरपिचाई महोदयेन सह मिलितवान्। अस्मिन् मेलने कृत्रिमबुद्धिमत्ता, अङ्कीय-नवोन्मेषः, प्रौद्योगिकीय-सहकार्यं चेत्यादिषु विषयेषु उभाभ्यामपि विचारविनिमयः विहितः। अत्रावसरे उभावपि जनौ भारतस्य ए.आई. विकासं, प्रतिभा-संवर्धनं, वैश्विक सहकार्य-विस्तारं च प्रोत्साहितुं संकल्पितवन्तौ ।

## सम्मेलने भारतदेशेन संयुक्त-राज्यामेरिका-देशेन च "पैक्स सिलिका" इति साहमत्यपत्रे कृतानि हस्ताक्षराणि




ऐषमः इंडिया ए.आई. इम्पैक्ट समिट् इति सम्मेलनस्य अवसरे 'पैक्स सिलिका' इति साहमत्यपत्रके हस्ताक्षरानन्तरं केन्द्रीयमन्त्री अश्विनी वैष्णवः अवदत् यत् अद्य विश्व भारतदेशे विश्वासं करोति। सः उक्तवान् यत् भारतं बौद्धिक सम्पदाधिकाराणां सम्मानं कुरुते, अस्माकं देशे विशालः कुशलप्रतिभा-समूहः विद्यते, युगपदेव भारतस्य विदेशनीतिः सदैव विश्वासनिर्माणाय समर्पिता आसीत्। एतेषां कारणानां फलरूपेण भारतं वैश्विक प्रौद्योगिकीय-सहकार्यक्षेत्रे विश्वसनीय सहभागि-रूपेण प्रतिष्ठितम् अस्ति। मन्त्रिमहोदयः एतद् अपि अवदत् यत् कृत्रिमबुद्धिमत्ता-क्षेत्रे भारतं न केवलं प्राविधिकीं क्षमतां संवर्धयति, अपितु उत्तरदायित्वपूर्णं मानवकेन्द्रितं च विकासमार्गं अनुसरति। 'पैक्स सिलिका' इति साहमत्यं भारतस्य नवोन्मेषशक्तेः, वैश्विकसहकार्यस्य, सुदृढनीतिप्रणाल्याः च प्रमाणम् अस्ति। सः विश्वासं व्यक्तवान् यत् एतादृशाः पदाक्षेपाः भारतं कृत्रिमबुद्धिमत्तायां उदयोन्मुख-प्रौद्योगिकीय-क्षेत्रेषु च अग्रणीभूमिकायाः निर्वहणे अधिकं सशक्तं करिष्यन्ति।

# अमितशाहः असम-राज्यस्य कछार-जनपदे "वाइब्रण्ट् विलेजेस् इति कार्यक्रमस्य द्वितीयम् उपक्रमम् " उद्घाटितवान्

**हिमसंस्कृतवार्ताः** - अमितशाहः असम-राज्यस्य कछार-जनपदे "वाइब्रण्ट् विलेजेस् इति कार्यक्रमस्य द्वितीयम् उपक्रमम् " उद्घाटितवान्। अयं कार्यक्रमः सीमवर्तिनां ग्रामाणां समग्र विकासाय, स्थायि-जीविकोपार्जनावसराणां सृजनाय च समर्पितः अस्ति। एतेन सुरक्षित सशक्त-सीमा-समुदायानां निर्माणं साध्यते तथा "विकसित-भारत-2047" इति दृष्टेः परिपूर्तिश्च विधास्यते। सीमावर्तिषु ग्रामेषु आधारभूत संरचनायाः सुदृढीकरणम्। स्थानीयजनानां कृते स्थायि-जीविकोपार्जनस्यावसराणां विस्तारः। सुरक्षित-सशक्त आत्मनिर्भर सीम-समुदायानां निर्माणम्। अस्य कार्यक्रमस्य मुख्योद्देश्यः सीमक्षेत्रेषु निवसतां नागरिकाणां जीवन-स्तरस्य उन्नयनम् अस्ति। मार्ग-निर्माणम्, विद्युत्-व्यवस्था, जल-सुविधा, स्वास्थ्य-शिक्षा केन्द्राणां विकासः च अस्य अन्तर्गतं प्रवर्तते। तथा च, कृषिकार्या-धारितोद्योगाः, हस्तशिल्प-प्रोत्साहनम्, लघु-उद्योग-स्थापनम् चेत्यादिभिः माध्यमैः ग्रामवासिनां कृते आय-वृद्धेः उपायाः क्रियन्ते। एतेन सीमक्षेत्रेषु स्थिरता, सुरक्षा, आत्मनिर्भरता च सुदृढा भवति ।

# हिमाचलप्रदेश सहितं २२ राज्येषु च केन्द्रशासितेषु प्रदेशेषु अप्रैलमासात् विशेषं गहनं पुनरीक्षणं (एसआईआर) भविष्यति

**हिमसंस्कृतवार्ताः:- शिमला।** निर्वाचनायोगः गुरुवासरे उक्तवान् यत् २२ राज्येषु च केन्द्रशासितेषु प्रदेशेषु अप्रैलमासात् विशेषं गहनं पुनरीक्षणं आरभ्यते। आयोगः राज्येभ्यः निर्देशं दत्तवान् यत् तेषां सम्यक् सिद्धताकार्यं शीघ्रं सम्पूर्णं कुर्वन्तु। एषा प्रक्रिया यदा सम्पूर्णा भविष्यति, तदा समस्ते राज्ये केन्द्रशासितप्रदेशे च तस्य परिधे भविष्यन्ति।आयोगेन आन्ध्रप्रदेश, अरुणाचलप्रदेश, हरियाणा, हिमाचलप्रदेश, झारखण्ड, कर्नाटकम्, महाराष्ट्र, मणिपुर, मेघालय, मिजोरम, नागालैण्ड, ओडिशा, पंजाब, सिक्किम, त्रिपुरा, तेलंगाना, उत्तराखण्ड इत्यादीनां मुख्यनिर्वाचनाधिकारिणां प्रति पत्रं प्रेषितं यत् ते सज्जता सम्पूर्णं कुर्वन्तु। अस्मिन् च चण्डीगढ, दादराः नगर हवेली तथा दमनं दीव, जम्मूकश्मीर, लद्दाख, दिल्ली च मुख्यनिर्वाचनाधिकारिणः सततम् सज्जाः भवेत्। निर्वाचनायोगेन उक्तं यत् मतदातृसूच्याः अखिलभारतीयं एसआईआर आदेशः गतवर्षे जूनमासे प्रदत्तः।

## १३ राज्येषु एसआईआर प्रक्रिया सम्पूर्णा

निर्वाचनायोगेन अद्यतने वर्षे १३ राज्येषु च केन्द्रशासितेषु प्रदेशेषु मतदातृसूच्याः विशेषसंशोधनम् (एसआईआर) कार्यम् आरभ्यते च असमे विशेषं पुनरीक्षणं क्रियते। शेषे २२ राज्येषु केन्द्रशासितेषु प्रदेशेषु अपि तादृशं प्रक्रिया करणीयास्ति। बिहारप्रदेशे एषा प्रक्रिया सम्पूर्णा, यतः निर्वाचनायोगः निरन्तरं चर्चायाम् उपस्थिता अस्ति। तथापि, लगभग षट् करोड़ मतदातॄणां सह १२ राज्येषु केन्द्रशासितेषु प्रदेशेषु एषा प्रक्रिया अद्यापि प्रवर्तते।

## एसआईआर (SIR) किं?

एसआईआरस्य पूर्णरूपम् “Special Intensive Revision” अस्ति, यस्य संस्कृते अनुवादः विशेषं गहनं पुनरीक्षणम्। एषः भारतनिर्वाचनायोगस्य मतदातृसूच्याः महतीं गहनं च शुद्धता- संशोधन-प्रक्रियाम् अस्ति।

## तस्य मुख्यं लक्ष्यम्-

1. योग्यमतदातॄणां (येषां नाम अद्यत्वे भवेत्) सूच्यां समावेशः।
2. अयोग्य/विपरीतनामानाम् उच्छेदनम्, यथा–
•मृत व्यक्तीनां नामानि
•द्वैधनामानि (एकः व्यक्तिः बहुषु स्थलेषु)
•स्थानान्तरेण अन्यत्र गत्वा अवशिष्टानि नामानि
•गैरनागरिकाः वा अयोग्य प्रवेशकाः यदि सन्ति, तेषां नामानि
3. लोकतन्त्रस्य दृढता सुनिश्चितकरणम्।
4. निर्वाचनेषु पारदर्शितायाः संवर्धनम्।

# हिमाचले १४५ अभवत् सीबीएसई- संयुक्त-विद्यालयानां संख्या, सर्वकारस्य अनुमोदनम्



हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेश- सर्वकारेण १५ अतिरिक्त- राजकीय-वरिष्ठ- माध्यमिक- विद्यालयानाम् सीबीएसई- संयुक्तं कर्तुं अनुमतिः प्रदत्ता। हमीरपुर- कांगड़ा- सोलन- बिलासपुर- सिरमौर- शिमला- मंडी-जिलानां १५ अन्य विद्यालयानां सम्मिलनात् अधुना सीबीएसई-संयुक्त-विद्यालयानां संख्या १४५ अभवत्।हमीरपुर-जिलायाः राजकीय- वरिष्ठ- माध्यमिक- विद्यालयाः बदारन-बटरान- रैल- जलाड़ी- कांगड़ा-जिलायाः राजकीय- वरिष्ठ- माध्यमिक- विद्यालयाः बरौह, गंगथ, ठाकुरद्वारा; सोलनजिलायाः चंडी, जोघो; बिलासपुरजिलायाः पंजगाईं; सिरमौरजिलायाः अंबोया, सराहन; शिमलाजिलायाः मतियाना; मंडीजिलायाः चौंतड़ा, कोटली एतेषु विद्यालयेषु सीबीएसई-पाठ्यक्रमस्य अध्यापनस्य निर्णयः कृतः।विभागीय-अधिकारिणः उक्तवन्तः यत् सीबीएसई- संयुक्तता बालकानां कृते राष्ट्रीय-स्तर-पाठ्यक्रम, मूल्याङ्कन-प्रणाली च, प्रतिस्पर्धात्मक- परीक्षायाः श्रेष्ठ-सिद्धता लाभाय समर्थ्यते।अनेन ग्रामीणप्रदेशे निवसन्तः छात्राः अपि नगर-विद्यालयेषु एव सुलभः शैक्षणिकसुविधा अनुभवितुं शक्नुवन्ति।सीबीएसई- संयुक्त-सर्वकारी- विद्यालयेषु व्याख्याता/ पीजीटी (लोक-प्रशासन) पदानां निरन्तरता विषयकम् अपि सर्वकारया निर्देशाः प्रदत्ताः। स्वीकृतपदानि अन्ये सर्वकारी-विद्यालयेषु स्थानान्तरेण प्रतिपाद्यन्ते, यत्र छात्राणां नामाङ्कनं अधिकम् अस्ति, विषयः वर्तमानकाले सञ्चालितः अस्ति। एतेषु पदेषु कार्यरतशिक्षकाणां स्थानान्तरणं सक्षम-प्राधिकृतस्य पूर्व-स्वीकृत्या एव सम्भवति।सर्वकारया निदेशालयं निर्देशितम् यत् सीबीएसई- संयुक्त-सर्वकारी-विद्यालयेषु लोक-प्रशासन-विषयं ऐच्छिक-विषयः इति आरम्भस्य संभावनायाः अध्ययनं क्रियते। तत्रार्थं भारत-सर्वकारस्य तथा सीबीएसई-संस्थायाः सह निश्चित-प्रक्रियायाः अन्तर्गतं विषय उपस्थाप्यते।

# विलयिताः बालक-बालिका-विद्यालयाः न भविष्यन्ति पिहिताः; पूर्ववत् एव सञ्चालिताः भविष्यन्ति

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे चयनितानां राजकीय- बालक-बालिका- विद्यालयानां विलयस्य विरोधे प्रचलत्सु प्रदर्शनेषु 'विद्यालयीय-शिक्षा-निदेशालयेन' स्थितिः स्पष्टीकृता। निदेशालयेन उक्तं यत् अस्याः प्रक्रियायाः अन्तर्गतं कोऽपि विद्यालयः पिहितः (बंद) न क्रियते। एतत् पदं केवलं प्रशासनिकः शैक्षणिकश्च परिष्कारः अस्ति, यस्य उद्देश्यं उपलब्ध-.संसाधनानां श्रेष्ठोपयोगं कुर्वन् शिक्षायाः गुणवतां सुदृढां करणम् अस्ति। निदेशालयस्य अनुसारं विलयान्तरं सम्बद्धानां विद्यालयानाम् आधारभूतसंरचना, शिक्षण- अशिक्षण- कर्मचारिवृन्दः च एकस्यैव प्रधानाचार्यस्य प्रशासनिकनियन्त्रणे भविष्यन्ति। अनेन 'अकादमिकनिरीक्षणं' सुदृढं भविष्यति, कर्मचारिणां मध्ये समन्वयः वर्धिष्यते, पठन-पाठनस्य मानकेषु च एकरूपता आगमिष्यति। विभागस्य तर्कः अस्ति यत् अस्याः व्यवस्थायाः कारणेन पारदर्शिता उत्तरदायित्वं च वर्धिष्यते।विद्यालयीय-शिक्षानिदेशकः आशीष कोहली अवदत् यत् विलयान्तरमपि उभौ विद्यालय-परिसरौ पूर्ववत् एव सञ्चालितौ भविष्यतः। कक्षाणां सञ्चालनविषये निदेशालयेन पृथक् रूपेण कार्यप्रणाली मार्गदर्शिकाः च सज्जीक्रियन्ते। स्थानीय- आवश्यकतानुसारं उपलब्ध-सुविधानुसारं च कक्षाणां विभाजनं भविष्यति। उदाहरणार्थम् एकस्मिन् परिसरे बालवाटिकातः अष्टमी- कक्षापर्यन्तं, द्वितीये परिसरे नवमीतः द्वादशी- कक्षापर्यन्तं पाठ्यक्रमाः प्रचलन्तः भवितुम् अर्हन्ति। अनया व्यवस्थया कक्षाणाम्, प्रयोगशालानां, पुस्तकालयानां, क्रीडाङ्गणानां च समुचितः उपयोगः सुनिश्चितः भविष्यति।शिक्षा-निदेशकेन उक्तं यत् येभ्यः विद्यालयेभ्यः सीबीएसई (CBSE) सम्बद्धता दत्ता अस्ति, सा पूर्वतन- बालक- बालिका- विद्यालयानां संयुक्त-संसाधनानां कर्मचारिणां च आधारेणैव लब्धा। पञ्जीकरणकाले सीबीएसई-सारस ६.० (SARAS 6.0) पटले उभयोः संस्थानयोः संयुक्त-विवरणं प्रस्तुतम् आसीत्। निदेशकः उक्तवान् यत् नूतनव्यवस्थायाः अनुरूपं विभागः शैक्षणिक- कर्मचारिणां च विषयाणां समीक्षां करोति। विषयवारं शिक्षकाणां नियुक्तिः भविष्यति, येन सीबीएसई- सम्बद्धविद्यालयेषु शिक्षा प्रभाविता न भवेत्। एषा प्रक्रिया पूर्णतः 'प्रशासनिक- एकीकरणम्' अस्ति। उभौ परिसरौ एकस्य प्रधानाचार्यस्य अधीनत्वात् शैक्षणिक-योजना श्रेष्ठा भविष्यति।

## उभौ परिसरौ पूर्णरूपेण कार्यरताः भविष्यन्ति- रोहितठाकुरः

शिक्षामन्त्री रोहितठाकुरः अवदत् यत् विद्यालयानां विलयः एकः सुविचारितः परिष्कारः अस्ति, यस्य लक्ष्यं राजकीय-शिक्षायाः सुदृढकरणम् अस्ति। कोऽपि विद्यालयः पिहितः न क्रियते उभौ परिसरौ च पूर्णरूपेण कार्यरताः भविष्यन्ति। उपलब्ध- संसाधनानां कर्मचारिणां च श्रेष्ठोपयोगं कृत्वा 'शिक्षण-परिणामेषु' (Learning Outcomes) परिष्कारः सर्वकारस्य प्राथमिकता वर्तते।

# नवीन-सीबीएसई-संयुक्तेषु सर्वकारीविद्यालयेषु प्रवेशः अध्ययनं च आरब्धम्, न पुस्तकानि न च शिक्षकाः




हिमसंस्कृतवार्ताः- शिमला।शिमलाजनपदायां शीतकालीनसत्रे नवीन- सीबीएसई- संयुक्त-सर्वकारीविद्यालयेषु छात्राणां प्रवेशः च अध्ययनं च आरब्धम् अस्ति। किन्तु एतेषु विद्यालयेषु अद्यापि न सीबीएसई-बोर्ड-पुस्तकानि प्राप्तानि, न च बोर्ड-तन्त्रम् अन्तर्गतं शिक्षकाः नियुक्ताः। एतस्मात् छात्राणां अध्ययनम् प्रभावितम् भवितुम् शक्यते। विभागेन एतत्कालं सीबीएसई- संयुक्तविद्यालयेषु हिमाचलप्रदेश- विद्यालय- शिक्षाबोर्ड- पाठ्यक्रमस्य अध्ययनम् आरब्धम्। तत्र तर्कः प्रदत्तः यत् उभयोः पाठ्यक्रमयोः विशेषभिन्नता नास्ति।प्रदेशसर्वकारेण शिमलाजनपदस्य २२ सर्वकारी- विद्यालयाः सीबीएसई इत्यत्र सम्मिलिताः। एतेषु अधिकांशः शीतकालीनसत्रे पाठ्यक्रमं अनुसृतवन्तः। एतेषु विद्यालयेषु नवीनं शैक्षणिकसत्रम् आरब्धम्। कतिपय विद्यालयेषु प्रवेशप्रक्रियया सह अध्ययनं अपि आरब्धम्। यत्र अध्ययनं आरब्धम्, तत्र छात्राणां हिमाचलप्रदेश- विद्यालय- शिक्षाबोर्ड-पाठ्यक्रम एव अध्ययनार्थं प्रदत्तम्, विद्यालयेषु अपि हिमाचलप्रदेश- विद्यालय- शिक्षाबोर्ड अन्तर्गतं नियुक्ताः शिक्षकाः एव शिक्षयन्ति। एतस्मात् छात्राणां अभिभावकानां च अध्ययन-प्रभावस्य चिन्ता अस्ति। विभागेन उक्तम् यत् छात्राणां अध्ययनम् एतस्मात् प्रभावितम् न भविष्यति। शीघ्रं विभागेन विद्यालयेषु सीबीएसई-पुस्तकानि उपलब्धं कर्तुं निश्चितम्।सीबीएसई- संयुक्त- विद्यालयेषु प्रवेशप्रक्रिया सम्पन्ना। उभे शिक्षामण्डले एनसीईआरटी- पाठ्यक्रमम् अनुसरन्ति। पाठ्यक्रमयोः विशेषभिन्नता न्यूनम्। एतस्मिन्नेव कालखण्डे एचपी-बोर्ड-पाठ्यक्रमस्य पुस्तकानि एव अध्ययनार्थं प्रयुक्तानि। शीघ्रं छात्राणां कृते सीबीएसई-पुस्तकानि उपलब्धं करिष्यन्ति।

-लेखराज भारद्वाजः
उपनिदेशक, शिक्षा-विभागः

# १६३ वर्षानन्तरं लालपानी-विद्यालये छात्राः सहशिक्षां कुर्वन्ति

राजधानी- शिमलास्थिते ऐतिहासिक- लालपानी-विद्यालये अधुना छात्राः छात्राः सह-अध्ययनं कुर्वन्ति। विद्यालयस्य सीबीएसई-संयुक्तं भवितुं च सह-शिक्षा (Co-Education) आरब्धा, पञ्च छात्राः अपि प्रवेशं कृतवन्तः। स्थापना-१६३ वर्षे पश्चात् लालपानी-विद्यालये सहशिक्षा आरब्धा। विद्यालयप्रशासनानुसारं, बुधवासरे प्रवेशप्रक्रिया आरब्धा। छात्राः प्रवेशार्थं आगच्छन्ति। पूर्वं विद्यालये षष्ठीतः द्वादशपर्यन्तं केवलं छात्राः अध्ययनं कुर्वन्ति स्म। अधुना विद्यालये २० छात्राः प्रवेशं कृतवन्तः, येषु पञ्च छात्राः अपि अन्तर्भवन्ति।विद्यालय-प्रवेशाय आगताः छात्राः पुष्पमालया सह स्वागतं कृतम्। अध्यापकानां मतम्, विद्यालयस्य सीबीएसई-संयुक्तं भवितुं च सह-शिक्षा आरब्धा प्रवेशः वर्धितुम् शक्यते। वर्तमानकाले विद्यालये लगभग ६०० बालकाः अध्ययनं कुर्वन्ति। प्रशासनस्य अनुसारम्, अद्यापि प्रवेशप्रक्रिया आरब्धा। सहशिक्षा आरम्भे प्रवेशकालः दीर्घतरा अभवत्। मार्चमासे अपि प्रवेशः निरन्तरं भविष्यति।
सर्वकारः निर्देशानुसार विद्यालये सह-शिक्षा आरब्धा। अधुना पञ्च छात्राः प्रवेशं कृतवन्तः। सह-शिक्षा आरम्भे छात्राणां संख्या वर्धितुम् अपेक्षा अस्ति।

# मण्डी-महाशिवराव्यां संस्कृतीनां महासङ्गमः, महोत्सवे ११ देशानां कलाकारैः प्रदर्शनं विहितम्, भारतस्य अपि ३३ दलैः लोकसंस्कृतेः प्रदर्शनं कृतम्



**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** मण्डीनगरस्य अन्ताराष्ट्रीय-महाशिवरात्रि- मेलापके एका भव्या 'सांस्कृतिक-शोभायात्रा आयोजिता। अस्मिन् महोत्सवे एकादश (११) तः अधिकदेशानां, भारतस्य विभिन्नराज्यानां च त्रयस्त्रिंशत् (३३) तः अधिक-सांस्कृतिक-दलैः भागः गृहीतः। अन्ताराष्ट्रीय- महाशिवरात्रि-महोत्सवस्य अवसरे शिक्षामन्त्री रोहितठाकुरः जिलाधीश- कार्यालय-परिसरात् इमां शोभायात्रां हरितसङ्केतं (हरी झंडी) दर्शयित्वा प्रस्थापितवान्।

अस्मिन् कार्यक्रमे-

१. अर्जेण्टीना-देशस्य 'फायर-डान्स' (अग्निनृत्यम्) अग्रेः ज्वालाभिः मञ्चं प्रकाशितं कृतवान्।

२. फ्रान्सदेशस्य पारम्परिकं लोकनृत्यं ग्रामीण- यूरोपीय- आकर्षणस्य परिचयं दत्तवान्।

३. अमेरिकादेशस्य 'ड्रम' (दुन्दुभिः) तथा समूहनृत्येन सह श्रीलङ्का-देशस्य दलद्वयेन लोककथाधारितं नृत्यं प्रस्तुतम्।

४. रूसदेशस्य 'एलईडी' (LED) नृत्यं, तथा च तञ्जानिया, नाइजीरिया, घाना, जिम्बाब्वे, लाइबेरिया, स्वाजीलैण्ड, लेसोथो, कैमरून, दक्षिण-अफ्रीका इत्यादीनां देशानां कलाकारैः मिलित्वा पारम्परिक-लोकनृत्यस्य प्रदर्शनं कृतम्।वेनेजुएला, नेपाल, कजाकिस्थान, कम्बोज (कम्बोडिया) देशानां दलैः अपि स्व- स्व- पारम्परिकनृत्यैः जनाः मन्त्रमुग्धाः कृताः। एतेन सहैव राजस्थानस्य, असमस्य, पञ्जाबस्य च 'भाङ्गा- गतका- मास्कनृत्यैः' जनानां ध्यानम् आकर्षितम्। मणिपुर- गुजरात- उत्तराखण्डसहितं हिमाचलस्य शिमला- हमीरपुर- कुल्लू- लाहौल-स्पीति- चम्बा- किन्नौर- सिरमौर-जनपदानां लोकनृत्यैः मण्डी- कलाकाराणां 'सांस्कृतिक-फैशन-शो' इत्यनेन च उपस्थिताः जनाः अतीव प्रसन्नाः अभवन्।

## संस्कृतीनां मिलनम्

शिक्षामन्त्री रोहितठाकुरः अवदत् यत् अन्ताराष्ट्रीय- महाशिवरात्रि- महोत्सवः केवलं श्रद्धायाः विषयः नास्ति, अपि तु एषः सांस्कृतिक- एकतायाः वैश्विक-भ्रातृभावस्य च प्रतीकः वर्तते। सः उक्तवान् यत् विभिन्नदेशेभ्यः राज्येभ्यः च आगतानां कलाकाराणां सहभागिता हिमाचलस्य 'अतिथि देवो भव' इति परम्परां सुदृढां करोति मण्डीनगरं च विश्वस्तरे नूतनं परिचयं ददाति।

# हिमाचलप्रदेशे विद्यालये प्रवेशं कर्तुं पूर्वमेव बालानां दृष्टिः क्षीणा; अस्य पृष्ठे किं कारणम् इति ज्ञायते



**हिमसंस्कृतवार्ताः- शिमला।** क्रीडाः, बहिर्गत-क्रियाकलापाः च परित्यज्य चलदूरवाणीयन्त्रे क्रीडाः, लघु- चलच्चित्रम्- दर्शनम्, एनिमेटिड-चलच्चित्र-दर्शनम्, अन्तर्जाल माध्यमेन अध्ययनं च एतेषाम् अभ्यासनात् बालानां दृष्टिः दुर्बला भवति। चिकित्सालयेषु अधुना विद्यालय- गमनवयः आरभ्यमाणात् अपि पूर्वं बालकाः दृष्टिदौर्बल्य- समस्यया उपचारार्थम् आगच्छन्ति। एतत् सर्वं चलदूरवाणी, गोष्ठी-यन्त्रादीनां सूक्ष्मकरणीय-यन्त्राणां अतिप्रयोगस्य परिणामः अस्ति। विशेषज्ञैः उक्तं यत् विद्यालय-प्रवेशात् पूर्वं बालानां नेत्रपरीक्षणं कर्तव्यम्। तेन ज्ञायते यत् अधिक-यन्त्रप्रयोगेन दृष्टिः क्षीणा अभवत् वा इति।यदि परीक्षणे दृष्टिः दुर्बला इति ज्ञायते, तर्हि समये एव उपयुक्त-संख्यायुक्तानि उपनेत्राणि धारयित्वा नेत्रसुधारस्य सम्भावना भवति। बालकस्य वर्धमानवयसा सह नेत्रशक्तिः अपि उन्नता भवितुम् अर्हति; कदाचित् चश्मा अपि परित्याज्यः भवेत्।दीन दयाल उपाध्याय- चिकित्सालयस्य ओपीडीविभागे प्रतिदिनं सरासरि त्रयः-चत्वारः लघुवयस्काः बालकाः नेत्रपरीक्षणार्थम् आगच्छन्ति। इंदिरागांधी चिकित्सालयस्य ओपीडी- विभागे पञ्च- सप्त बालकाः प्रतिदिनं आगच्छन्ति। एते अङ्काः पूर्वात् अधिकाः सन्ति।

नेत्र-सुरक्षायै बालानां स्क्रीन-समय न्यूनं कर्तुं पितृभ्यः अपि कठिनं जातम् अस्ति। एतेषु गेजेट- यन्त्रेषु वर्धमाना आसक्तिः, ऑनलाइन-शिक्षणम्, मोबाइलद्वारा एव मनोरञ्जनम् एतानि सर्वाणि नेत्रयोः कृते महत् संकटम् अभवन्। आहार- परिवर्तनम्, हरितशाकानां न्यून-सेवनम्, जङ्क- भोजनस्य अधिक-उपयोगः अपि नेत्र-दौर्बल्यस्य कारणं भवति। बहिर्गतक्रीडानाम् अभावः, मोबाइल- लेपटॉप- स्क्रीन- टाइमवृद्धिः च बालानां नेत्रयोः प्रत्यक्षं दुष्प्रभावं जनयति।

## स्क्रीन-समयः नेत्रयोः शुष्कतां वर्धयति

इंदिरागांधी चिकित्सा महाविद्यालयः संस्थायाः नेत्ररोग- विभागस्य डॉ. प्रवीणपंवरस्य मतम् अस्ति यत् मोबाइल-लेपटॉप-यन्त्रयोः निरन्तर-उपयोगः, रील-दर्शनम्, ऑनलाइन-अध्ययनम् च बालानां नेत्रयोः दुष्प्रभावं जनयन्ति। समीपे स्थितत्वात् गेजेट्-यन्त्रेभ्यः निर्गता दीप्तिः, ऊष्मा, चक्षुषोः तनावः च शुष्कतां वर्धयन्ति तथा दृष्टिं क्षीणां कुर्वन्ति।अतः अभिभावकैः विद्यालय-गामिनां बालानां नेत्र-परीक्षणं कर्तव्यम्। आवश्यकता चेत् चिकित्सां कारयेत्। अपेक्षिते सति चश्मानि, नील-प्रकाश-रक्षण-चश्मानि च धारयेत्। समये चश्म-धारणेन बालानां नेत्रयोः स्थितिः सुधारयितुं शक्यते।

**-पवनकुमारनेगी प्रधानाचार्यः,लालपानी-विद्यालयः**

# अखिलभारतीय- आयुर्विज्ञान- संस्थानम् बिलासपुर संस्थायां मायोसाइटिस-प्रभृतयः घातकरोगाणां परीक्षणानि साधनीयानि भविष्यन्ति। जनानां भविष्यति महती उपशान्तिः



**हिमसंस्कृतवार्ताः- बिलासपुरम्।** हिमाचलप्रदेशस्य सहस्रशः ये रोगिणः मांसपेशी- त्वग्विकारैः सम्बद्धानां रहस्यमयानां रोगाणां चिकित्सार्थं चण्डीगढ- देहली- जालन्धर- निजीचिकित्सालयान् गन्तुं बाध्यन्ते स्म, तेषां कृते एषा अत्यन्तं सुखदवार्ता अस्ति।

एम्स बिलासपुरस्थितस्य क्लीनिकल- इम्यूनोलॉजी एवं रुमेटोलॉजी-विभागेन एतेषां जटिलरोगाणां मूलकारण-निर्णयार्थम् अत्याधुनिक- लाइन- इम्यूनो- असे- किट-क्रयप्रक्रिया आरब्धा अस्ति। मायोसाइटिस, सिस्टमिक-स्केलेरोसिस- प्रभृतयः घातकरोगाः सम्बद्धाः १५० विशिष्ट- परीक्षण- प्रोफाइल शीघ्रमेव विभागे उपलब्धाः भविष्यन्ति। अनेन परीक्षणव्यये ७०-८० प्रतिशतपर्यन्तं न्यूनता आगमिष्यति।रोगिणां कृते सप्ताहपर्यन्तं प्रतीक्षायाः आवश्यकता न भविष्यति। अद्यावधि प्रदेशे एतेषां रोगाणां लक्षणानि- यथा आकस्मिक- मांसपेशी-दौर्बल्यं, त्वचायाः कठोरता इत्यादीनि दृष्ट्वा चिकित्सकैः पृथक्-पृथक् परीक्षणानि करणीयानि आसन्।नवीन-एलआईए-किट-विशेषता एषा अस्ति यत् एकस्मिन् एव पट्टिकायां (स्ट्रिप) पञ्चदशाधिकाः एण्टिजेन-सूचकाः सन्ति। अतः एकवारं रक्त- प्रारूपदानेन एव शरीरे अन्तर्निहितानां पञ्चदशाधिकानां घातक- सूचक-प्रतिपिण्डानां (एण्टिबॉडीज) अन्वेषणं शक्यं भविष्यति। इदानीं निजी-प्रयोगशालासु एतेषां परीक्षणानां कृते रोगिभ्यः ८ सहस्रात् १२ सहस्र-रूप्यकपर्यन्तं व्ययः भवति स्म। तदनन्तरं नमूनानि देहलीं प्रेष्यन्ते स्म, यत्र प्रतिवेदनप्राप्तौ १०-१५ दिवसाः यावत् कालः यायात्। अत्र तु सर्वकारी-दरेण मूल्यं न्यूनं भविष्यति, ४८-७२ घण्टानां मध्ये प्रतिवेदनं प्राप्तुं शक्यं भविष्यति।मायोसाइटिस-रोगे शरीरे रोग-प्रतिरोधक-शक्तिः स्वस्यैव मांसपेशीषु आक्रमणं करोति, येन रोगी अत्यन्तं दुर्बलः भवति; तस्य उत्थानं, उपवेशनं, गमनं च कठिनं भवति। सिस्टमिक- स्केलेरोसिसरोगः “शिलारोगः” इति अपि कथ्यते। अस्मिन् रोगे त्वचा, रक्तवाहिन्यः, फुफ्फुसप्रभृतयः आन्तरिक-अङ्गानि शिलावत् कठोराणि भवन्ति, यत् समये निदानं न कृतं चेत् प्राणघातकं भवितुम् अर्हति।

शीघ्र-निदानेन रोगः आरम्भे एव ज्ञास्यते। प्रायः पर्वतीय-दूरप्रदेशेषु निवसन्तः रोगिणः तदा एव चिकित्सालयं गच्छन्ति यदा रोगः गम्भीररूपं धारयति। अस्या नव-प्रविधेः साहाय्येन न केवलं रोगनिदानं शीघ्रं भविष्यति, अपि तु संक्रमणं हृदयस्य वा फुफ्फुसयोः प्रति प्रसृतम् अस्ति वा इति अपि पूर्वमेव ज्ञास्यते। अनेन शीघ्र-चिकित्सा आरब्धुं शक्यते।

# “दशदिवसीययोगकार्यशालायाः सफल-समापनम्”






## 95% उपस्थितछात्रेषु प्रखर-बुटोला ₹3000, धनराशिद्वारा सम्मानितः , सोनमः शुभमः योगप्रशिक्षकाय सम्मानितौ

मालिनीवैलीकालेज_इफ_एजुकेशन कोटद्वार इत्यत्र दशदिवसीय-योग-प्रशिक्षण-शिविरस्य सफलतया समापन-समारोहः आयोजितः। इयं योगकार्यशाला सार्थकयोगशालायाः च संस्कृतभारत्याः सहयोगेन सम्पन्नोभवत्।अयं प्रशिक्षण-कार्यक्रमः मुख्यतया अष्टाङ्ग-योगाधारितः आसीत्। अस्मिन् यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यानादीनां विषयाणां सैद्धान्तिकी तथा व्यवहारिकी कौशलं प्रदत्तं। प्रतिदिनं योगाभ्यासः, प्राणायामः, ध्यानम्, मन्त्रोच्चारणम्, संतुलित-जीवन-शैली च विशेषरूपेण अभ्यासिताः।योगगुरोः राकेश-कण्डवाल-महोदयस्य मार्गदर्शने सार्थकयोगशालासंस्थायाः प्रशिक्षकौ सोनम्-रावत-महोदया शुभमरावत-महोदयश्च शिविरस्य संचालनं सफलतया अकुरुताम्। समापनसमारोहे राजगौरव-नोटियालः , जयवीर-सिंह-रावतः , सोनिया ध्यानी, शोभा-रावतः उपस्थिताः आसन्। कार्यक्रमस्य संचालनं डॉ० रमाकान्तकुकरेती-महोदयेन कृतम् च धन्यवादज्ञापनम् प्राचार्यवर्यया कृतम् । कार्यशालायाः संयोजिकया श्वेतारावतवर्यया एकादशदिनांकतः सर्वे शिक्षाशास्त्रिणः योगाय सम्प्रेरिताः च योगविषये सप्तचक्राणां च पञ्चकोषानां विषये मार्गदर्शनं कृतं । योगः स्वस्थ-अनुशासित-जीवनस्य आधारः इति प्रतिपाद्यविषये — “फिटनेस-की-डोज़, आधा-घण्टा-रोज़” इति सन्देशः जन-जनं प्रति प्रसारितव्यः इति मार्गदर्शकानाम् आह्वानं आसीत्। संस्कृतभारत्याः पौड़ीविभागसहसंयोजकः कुलदीप-मैन्दोला प्रतिदिनं मार्गदर्शनं कुर्वन् उक्तवान् यत् समस्तकर्माणि अस्माकं योगे भवन्ति ज्ञानयोगे कर्मयोगे भक्तियोगे , वैराग्ययोगे अपि योगसम्पूर्तिः भवति । पतञ्जलिना योगसूत्रं प्रदत्तं च महाभाष्ये व्याकरणसूत्राणां च शब्दनिष्पादने सुन्दरव्याख्या अपि कृता।अस्मिन् अवसरे प्रशिक्षकौ सोनम्-रावत-महोदया शुभम्-महोदयश्च तयोः उत्कृष्ट-योगदानाय सम्मानितौ। तौ अत्र योगद्वारा दसदिवसीयकार्यशालायां योगस्य विभिन्नासनसूत्राणां च सम्यक् प्रदर्शनं कारितवन्तौ ।तथैव महाविद्यालयाध्यक्षेन योगम्बर-सिंह-महोदयेन गत-सत्रे 95% उपस्थितछात्रेभ्यः प्रोत्साहन-राशिः वितरिता। प्रखर-बुटोला ₹3000, आकांक्षा-रावतः ₹2000, अभिषेक-सती ₹2000, प्रियंका-जोशी ₹2000, अनु ₹2000, ऋतिक-बन्दूनी ₹2000, सर्वज्ञ-बुटोला ₹2000, अनुराधा ₹1000, नेहा-नेगी ₹1000 इति धनराशिः प्रदत्ता। अन्ते सर्वैः अतिथिभिः, प्रशिक्षकैः, छात्रैः च योगाभ्यासः नित्य-जीवनस्य अनिवार्य-अङ्गत्वेन स्वीकरणीयः इति संकल्पः कृतः। एवं स्वास्थ्य-रक्षा, अनुशासन-पालनम्, नशामुक्तिः, आध्यात्मिक-उन्नतिः च इति संकल्पेन कार्यशाला सफलतया सम्पन्ना।

# सङ्घशक्तिः महती

जनसमूहस्य मध्ये सङ्घर्षमयः परिवेशः अस्माकं दुर्बलता कथ्यते, तद्विपरीततया सङ्घटितम् ऐक्यञ्च च अस्माकं बलं स्यात्। यथा क्षणानां समूहः एकः जीवनकालः भवति, तथैव जलबिन्दूनां समूहश्च एकः महासागरः भवति। केषाञ्चन जनानां समूहः यथा एकः परिवारः कथ्यते, तथैव केषाञ्चन परिवाराणां समूहः एकः समाजः उच्यते। एकस्य क्षणस्य न तावत् महत्त्वं, तस्य सामूहिकरूपं हि अस्माकं जीवनरूपेण प्रकटीभवति। एवमेव एकस्य जलबिन्दोः नु किं वा तावत् महत्त्वम्? परन्तु जलबिन्दूनां सम्मिलिता शक्तिः एकस्य महासागरस्य निर्माणं कर्तुमर्हति। ऐक्यशक्तिर्हि एकस्मिन् सम्मिलिते परिवारे परिलक्षिता भवति, एवञ्च तच्छक्त्याः विशालरूपं वयम् एकस्मिन् समाजे, राष्ट्रे वा द्रष्टुं शक्नुमः। यदा वयं प्रकृतिं पश्यामः, तत्रापि महती ऐक्यशक्तिः परिलक्षिता भवति। निस्तब्धस्थाने किञ्चन एकाकितया स्थितं पुष्पम्, कश्चन एकाकी वृक्षः वा हसन्नपि रोदिति। वाटिकायां स्थितानां दशभिः पुष्पैः सह, दशवृक्षाणां शोभा द्विगुणिता भवति। यदा कश्चन मनुष्यः चतुर्भिः जनैः सह तिष्ठति, सः अन्तःकरणे एकां नूतनशक्तिम् अनुभवति, प्राप्नोति च। कस्मिँश्चिदपि कठिनकाले चतुर्णां जनानां सम्मिलिता शक्तिः तं प्रोत्साहयति, तत्कठिनकालविरुद्धं योद्धुम्, अपसारयितुञ्च बलं प्राप्नोति। काचित् समस्या उद्भवेन्नाम, तत्र चतुर्णां जनानां सम्मिलितविवेकः तत्समाधातुमर्हति। एवं लघुलघुजीवजन्तूनां व्यवहारमपि यदि वयं पश्यामः तर्हि एतद्वचनं स्पष्टीभवति। खगानाम् एकता श्लाघनीया। एकस्याः पिपीलिकायाः शक्तिर्नु कियती स्यात्? परं तासां सम्मिलिता शक्तिः महद्भ्यः पशुभ्यः अपि न न्यूना। यत् मधु वयं मधुमक्षिकाभ्यः प्राप्नुमः, तत् तासां सम्मिलितशक्त्याः फलमेव। किमधिकम्? यदि अस्माकं शरीरस्य सर्वाणि अङ्गप्रत्याङ्गानि सम्मिल्य कार्यं न कुर्युः, तर्हि अस्माकं जीवनं हि न प्रवर्तेत, जीवनं हि नश्येत्। एका एका इष्टिका सम्मिल्य एकस्य विशालस्य भवनस्य निर्माणं करोति। एकताशक्तिं स्पष्टीकर्तुं वृद्धजनाः वदेयुः- "दश की लाठी एक का बोझ", "अकेला चना भाड़ नहीं फोड़ सकता" इत्यादि। अतः सङ्घे हि शक्तिः विद्यते, विशेषतः अस्मिन् युगे। उक्तमस्ति- "सङ्घे शक्तिः कलौ युगे" इति। इतिहासः अपि अस्मिन् विषये साक्षिभूतः यत् एकतायां हि बलमस्तीति। भारतेन एकताबलं न ज्ञातं, तस्मात् पराधीनं जातम्। भ्रातरः पारस्परिके कन्दले निमज्जिताः अभवन्, तस्मात् विदेशिनां लाभः अभवत्। जापानः लघुदेशः, कश्चन द्वीपः, परम् एकताबलेन उन्नतिशिखरं प्राप्नोत्। आङ्ग्लानां सफलता अपि एकताकारणतः समभवत्। रूसः एकताबलतः हि स्वक्षेत्रं सबलम् अकरोत्। चीनः स्वकीयं नवनिर्माणम् अकरोत्। परं यस्मिन् देशे अनेकता आगता, तादृशः देशः बलहीनः, विनष्टः वा जातः। तस्मात् मानवजातिः विश्वोन्नत्यर्थं, विश्वशान्त्यर्थञ्च सदैव ऐक्यभावनया तिष्ठेदिति।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। आदौ आरोग्य-विषयः। एकया पौत्र्या कथितं यत् तस्याः पितामहः स्वस्थः अस्ति। सः चतुर्नवति-वर्षीयः वर्तते। तेन उक्तं यत् महार्घ-व्यायामशाला न गता, अपि तु गृहे एव योगः आचरितः।

**नन्दिनी-** एतत् तु बहु उत्तमम्। किन्तु चीन-देशे विपरीता रीतयः दृष्टाः। तत्र मातापितृभ्यां बालाः इव आचरणं कृतम्। "वयम् अशक्ताः" इति तैः नटितम्, येन पुत्राः दायित्वं स्वीकुर्युः।

**काव्या-** विचित्रं खलु। अस्मिन् देशे तु वीराणां स्मरणं कृतम्। छत्रपतेः शिवाजी-महाराजस्य जयन्ती-पर्वणि पुरीतटे एका विशाला सिकता-मूर्तिः निर्मिता। सा "मानस-कुमार" नाम्ना कलाकारेण रचिता।

**नन्दिनी-** सा कलाकृतिः शोभना। अन्ते शिक्षण-शुल्कस्य वार्ता। मुम्बा-नगरे बाल-विद्यालयस्य शुल्कं दृष्ट्वा एकः युवकः चकितः जातः। तेन उक्तं यत् तस्य अभियान्त्रिकी-शुल्कात् अपि शिशु-शुल्कम् अधिकम् अस्ति।

# "लौकिकन्यायकोशः"

# "मेषयुद्धन्यायः"

परस्परं युद्ध्यतोः द्वयोः मेषयोः मध्ये तयोः कलहम् उपशमयितुं कश्चन शृगालः गतः। परन्तु तयो प्रहारैः स एव मृतः। एवं बलवतोः कलहं विना कारणं गतः दुर्बलः अवश्यमेव नाशं प्राप्नोति इति भावः।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

sudha_sathaye@yahoo.com

## काश्यपः एव सर्वेषां मूलपुरुषः, गोत्रप्रवर्तकश्च

कश्यप ऋषेः त्रयोदश पत्न्यः आसन्। तासां गर्भेभ्यः देवाः, दानवाः, नागाः, पक्षिणः तथा पृथिव्यां स्थिताः सर्वे जीवाः उत्पन्नाः। अतः काश्यपः एव सर्वेषां मूलपुरुषः तथा गोत्रप्रवर्तकः अभवत्। यस्य कस्यापि गोत्रं न ज्ञायते, तर्हि “काश्यपगोत्रम्” इति उच्चार्यते।

**काश्यपपत्नी- वंशः**

१. अदितेः गर्भे सर्वे देवा अजायन्त- सूर्यः, इन्द्रः, अर्यमन्, त्वष्टा, सविता, धाता, वरुणः, भगः, अंशः, मित्रः, पूषा तथा वामनः।

२. दितेः गर्भे हिरण्याक्षः, हिरण्यकशिपुः तथा सिंहिका (होलिका) इति राक्षसाः अजायन्त।

३. दनुः शतं दानवानां माता आसीत्। ते सर्वे एव दुष्टाः न आसन्। मयासुरः (वास्तुशिल्पी) तेषां मध्ये एकः आसीत्।

४. अरिष्टा गन्धर्वाणां माता आसीत्। गन्धर्वाः गीतनृत्यकुशलाः आसन्।

५. सुरसा नागानां माता आसीत्।

६. खसा देवतानां माता आसीत्। तेषु देवदानवयोः मिश्रणमासीत्यथा- कुबेरः।

७. सुरभिः गवां महिषीणां च माता आसीत्।

८. विनता अरुणस्य पक्षिराजस्य गरुडस्य च माता आसीत्।

९. तारा नाम्न्याः षट् कन्याः आसन्। तासां गर्भेभ्यः गर्दभः, उष्ट्रः, काकः तथा उलूकः उत्पन्नाः।

१०.क्रोधवशा चतुर्दश-सहस्राणाम् असुराणां माता आसीत्।

११. इला नाम्न्याः गर्भेभ्यः वृक्षाः, गुल्माः, पुष्पाणि तथा औषधयः उत्पन्नाः।

१२. कद्रूः शेषः, वासुकिः, तक्षकः तथा नहुषः इत्यादीन् शक्तिशालिनः नागान् अजनयत्।

१३. मुनिः स्वर्गस्थितानाम् अप्सरसां माता आसीत्।